# tulasIgItA

# तुलसीगीता

## Document Information

Text title : tulasIgItA

File name : tulasIgItA.itx

Category : gItA, giitaa, tulasI

Location : doc_giitaa

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : May 18, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# तुलसीगीता

श्रीभगवानुवाच -
प्राग्दत्वार्घं ततोऽभ्यर्च्य गन्धपुष्पाक्षतादिना ।
स्तुत्वा भगवतीं तां च प्रणमेद्दण्डवद्भुवि ॥ १॥

श्रियं श्रिये श्रियावासे नित्यं श्रीधवसत् रते ।
भक्त्या दत्तं मया देवि अर्घं गृह्ण नमोऽस्तु ते ॥ २॥

निर्मिता त्वं पुरा देवैरर्चिता त्वं सुरासुरैः ।
तुलसि हर मे पापं पूजां गृह्ण नमोऽस्तु ते ॥ ३॥

महाप्रसादजननी आधिव्याधिविनाशिनी ।
सर्वसौभाग्यदे देवि तुलसि त्वां नमोऽस्तु ते ॥ ४॥

या दृष्टा निखिलांससंघशमना स्पृष्टा वपुःपावना
रोगाणामभिवन्दिता निरसनी सिक्तान्तकत्रासिनी ।
प्रत्यासक्तिविधायिनी भगवतः कृष्णस्य संरोपिता
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥ ५॥

भगवत्यास्तुलस्यास्तु माहात्म्यामृतसागरे ।
लोभात् कूर्दितुमिच्छामि क्षुद्रस्तत् क्षम्यतां त्वया ॥ ६॥

श्रवणाद्वादशीयोगे शालग्रामशिलार्चने ।
यद्फलं सङ्गमे प्रोक्तं तुलसीपूजनेन तत् ॥ ७॥

धात्रीफलेन यत् पुण्यं जयन्त्यां समुपोषणे ।
तद्फलं लभते मर्त्यास्तुलसीपूजनेन तत् ॥ ८॥

यद्फलं प्रयागस्नाने काश्यां प्राणविमोक्षणे ।
तद्फलं विहितं देवैस्तुलसीपूजनेन तत् ॥ ९॥

चतुर्णामपि वर्णानामाश्रमाणां विशेषतः ।

स्त्रीणां च पुरुषाणां च पूजितेष्टं ददाति च ॥ १०॥

तुलसी रोपिता सिक्ता दृष्टा स्पृष्टा च पावयेत् ।
आराधिता प्रयत्नेन सर्वकामफलप्रदा ॥ ११॥

प्रदक्षिणं भ्रमित्वा ये नमस्कुर्वन्ति नित्यशः ।
न तेषां दुरितं किञ्चिदक्षीणमवशिष्यते ॥ १२॥

पूज्यमाना च तुलसी यस्य वेश्मनि तिष्ठति ।
तस्य सर्वाणि श्रेयांसि वर्धन्तेऽहरहः सदा ॥ १३॥

पक्षे पक्षे च द्वादश्यां सम्प्राप्ते तु हरेर्दिने ।
ब्रह्मादयोऽपि कुर्वन्ति तुलसीवनपूजनम् ॥ १४॥

अनन्यमनसा नित्यं तुलसीं स्तौति यो जनः ।
पितृदेवमनुष्याणां प्रियो भवति सर्वदा ॥ १५॥

रतिं करोमि नान्यत्र तुलसीकाननं विना ।
सत्यं ब्रवीमि ते सत्ये कलिकाले मम प्रिये ॥ १६॥

हित्वा तीर्थसहस्राणि सर्वानपि शिलोच्चयान् ।
तुलसीकानने नित्यं कलौ तिष्ठामि भामिनि ॥ १७॥

न धात्रा सफला यत्र न विष्णुस्तुलसीवनम्।
तत् स्मशानसमं स्थानं सन्ति यत्र न वैष्णवाः ॥ १८॥

तुलसीगन्धमादाय यत्र गच्छति मारुतः ।
दिशो दश च पूताः स्युर्भूतग्रामाश्चतुर्दशः ॥ १९॥

तुलसीवनसंभूता छाया पतति यत्र वै ।
तत्र श्राद्धं प्रदातव्यं पितृणां तृप्तिहेतवे ॥ २०॥

तुलसी पूजिता नित्यं सेविता रोपिता शुभा ।
स्नापिता तुलसी यैस्तु ते वसन्ति ममालये ॥ २१॥

सर्वपापहरं सर्वकामदं तुलसीवनम् ।
न पश्यति समं सत्ये तुलसीवनरोपणात् ॥ २२॥

तुलस्यलङ्कृता ये वै तुलसीवनपूजकाः ।
तुलसीस्थापका ये च ते त्याज्या यमकिङ्करैः ॥ २३॥

दर्शनं नर्मदायास्तु गङ्गास्नानं कलौ युगे ।
तुलसीदलसंस्पर्शः सममेतत्त्रयं स्मृतम् ॥ २४॥

दारिद्र्यदुःखरोगार्तिपापानि सुबहून्यपि ।
हरते तुलसीक्षेत्रं रोगानिव हरीतकी ॥ २५॥

तुलसीकानने यस्तु मुहूर्तमपि विश्रमेत् ।
जन्मकोटिकृतात् पापात् मुच्यते नात्र संशयः ॥ २६॥

नित्यं तुलसिकारण्ये तिष्ठामि स्पृहया युतः ।
अपि मे क्षतपत्रैकं कश्चिद्धन्योऽर्पयेदिति ॥ २७॥

तुलसीनाम यो ब्रुयात् त्रिकालं वदने नरः ।
विवर्णवदनो भूत्वा तल्लिपिं मार्जयेद्यमः ॥ २८॥

शुक्लपक्षे यदा देवि तृतीया बुधसंयुता ।
श्रवणया च संयुक्ता तुलसी पुण्यदा तदा ॥ २९॥

इति तुलसीगीता समाप्ता ॥

Encoded and proofread by PSA Easwaran

*tulasIgItA*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*